देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकी वार्तापत्रिका

# रघुनाथवार्तावली

द्वितीयवर्षम् ( २०१७ ) ५-६ अङ्कौ

जुलाई-सितम्बर, अक्टूबर-दिसम्बर २०१७



नानाविषयसम्बद्धाः नानारसपरिप्लुताः।
परिसरीयवार्तास्ताः वार्तावल्यां प्रकाशिताः॥

रघुनाथवार्तावली कृपया श्रीरघुनाथस्य प्रसरेत्।
दिशि दिशि प्रापयेदथ वार्ताः परिसरस्याभिनवाः॥

**प्रधानसम्पादकः**
प्रो. के.बी. सुब्बरायुडुः
( प्राचार्यः )

**परामर्शदातृमण्डलम्**
प्रो. बनमालीबिश्वालः
डा. प्रफुल्लगडपालः

**सम्पादकौ:**
डा. मनीषजुगरानः
श्री श्रीओमशर्मा

'रघुनाथवार्तावली'-सम्बद्धमभिप्रायम्, प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
srkvarta@gmail.com

परिसरस्य जालपुटेऽपि रघुनाथवार्तावली द्रष्टुं शक्यते-
website : www.srkcampus.org

देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकी वार्तापत्रिका

**रघुनाथवार्तावली**

प्रकाशकः
राष्ट्रियसंस्कृतसंस्थानम्
**श्रीरघुनाथकीर्तिपरिसरः**
देवप्रयागः, पौडी-गढवालः
उत्तराखण्डः-249 301
(दूरभाषः - 01378-266028)
email : srkcampus@gmail.com
website : www.srkcampus.org

## पुरोवाक्

भगवतः श्री रघुनाथस्य सुमहत्या कृपया त्रैमासिक्याश्चास्या रघुनाथ-वार्तावल्याः (परिसरीय-वार्तापत्रिकायाः) पञ्चम-षष्ठ-प्रसूनौ संयुक्तौ-प्रस्फुटितौ भवतः इति महतः प्रमोदस्यावसरः। इतः पूर्वं गते एव वर्षे द्वौ संयुक्ताङ्कौ (१-२, ३-४) प्रकाशितौ। वर्षद्वयात् न्यूनेऽपि काले परिसरस्योपलब्धेः परिपक्वता सन्तोषं जनयति। तदर्थम् अस्माकं परिसरीय-शैक्षिकसदस्याः, कार्यालयीय-सदस्याः विद्यार्थिनश्च धन्यवादार्हाः। प्रथमे वर्षे क्वचित् सहानुभूतेः पात्रताऽवलोक्यते स्म परिसर-गौरव-मूल्याङ्कनप्रसङ्गेषु। परन्त्वस्मिन् वर्षे अस्माभिः स्वप्रतिभोपलब्धिबलेनापि न केवलं स्वकीयमस्तित्वं रेखाङ्कितमपितु भाविनी सफलताऽपि सङ्केतिता।

अस्मिन् वर्षेऽपि परिसरीयविभागानां पक्षतः विशिष्ट-व्याख्यानानि राष्ट्रियान्ताराष्ट्रियशोधसम्मेलनानि च प्रस्तावितानि। फरवरीमासस्य प्रथमे सप्ताहे साहित्य-व्याकरणविभागयोः अन्ताराष्ट्रिय-सङ्गोष्ठ्योः तथा चान्येषां विभागानां राष्ट्रियसङ्गोष्ठीनाम् आयोजनं सङ्कल्पितम्। ०८.११.१७ दिनाङ्के उच्चशिक्षाराज्यमन्त्रिणः डा. सत्यपालसिंह-महोदयाः परिसरस्य शैक्षिक-प्राशासनिकभवनानां शिलान्यासं कृतवन्तः इति महद् गौरवं परिसरस्य। प्रथमे पर्याये गते वर्षे उत्तराखण्डस्य राज्यपाल-महोदयैः माननीयैः डॉ. कृष्णकान्तपालमहोदयैः आवासीय-भवन-क्रडाङ्गनयोः शिलान्यासः कृतः आसीत्।

एवं विविधैः साहित्यिक-सांस्कृतिक-शैक्षिक-प्राशासनिक-गतिविधिभिः परिसरः अनूदिनं प्रगतिपथे अग्रेसरति। परिसरस्य विविधगतिविधिषु यथोचितप्रगतये विहितप्रयासेभ्यः समेभ्यः परिसरीयसदस्येभ्यः अवसरेऽस्मिन् साधुवादान् प्रदाय विरमामि विस्तरादिति शम्।

**के.बी. सुब्बरायुडुः**
प्राचार्यः, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः

## सम्पादकीयम्

रघुनाथवार्तावल्याः नवीनाङ्कौ (५-६ अङ्कौ) पुनः संयुक्तरूपेण लोकाय समर्प्य मोमुद्यन्ते अस्मच्चेतांसि। पूर्वाङ्कवद् इमौ अपि अङ्कौ विविधस्थायिस्तम्भैः शोभन्ते इति वक्तव्यस्यावश्यकता नास्ति। यतोहि सहृदयाः पाठकाः एव तत्र प्रमाणभूताः। एतौ चाङ्कौ कियता विलम्बेनागतौ इति यद्यपि खेदस्य विषयः तथापि एतेन अस्याः पत्रिकायाः पाठकीया जिज्ञासा कियती बलवतीति ज्ञातुमस्माभिः कश्चनावसरो लब्धः। एतच्च तथ्यमस्मान् प्रोत्सायति अन्यान् अपि अग्रिमानङ्कान् समयेन प्रकाशयितुम्। पूर्वाङ्कानां तुलनया यद्यपि वर्तमानौ अङ्कौ आकृत्या लघुरूपौ स्तः, तथापि तथ्यदृष्ट्या न काचिदपि लघुताऽत्र वर्तते इत्युद्घोषणे महान् अस्माकं सन्तोषः। वस्तुतः एतस्याः वार्तावल्या माध्यमेन वयं परिसरस्य सर्वं कार्यवृत्तम् अनायासेन जनान् प्रापयितुं समर्थाः भवामः इत्यपरं महत्त्वमस्य प्रकाशनस्य। परिसरस्येतिहाससंरक्षणे अस्याः पत्रिकायाः भूमिका अनस्वीकार्या।

अन्ते च सर्वेभ्यः परिसरीय-विद्वद्भ्यः, छात्रेभ्यः, अतिथिभ्यः, पाठकेभ्यश्च प्रोत्साहनार्थं कार्तज्ञ्यं विनिवेद्य विरमामो विस्तरात्।

**आ नो भद्राः क्रतवो यन्तु विश्वतः।**

**-सम्पादकाः**

## सुसम्पन्नः परिसरस्य द्वितीयचरणस्य शिलान्यासकार्यक्रमः




शिलान्यासकार्यक्रमे भाषमाणः श्रीसत्यपालसिंहमहोदयः

देवभूमौ उत्तराखण्डे अलकनन्दा-भागीरथ्योः पवित्रे सङ्गमे देवप्रयागे राष्ट्रियसंस्कृतसंस्थानस्य नवोद्घाटितस्य श्रीरघुनाथकीर्ति-परिसरस्य-प्राशासनिकभवन-छात्रावास-पुस्तकालय-आवासीय-भवनानां द्वितीयचरणस्य शिलान्यासकार्यक्रमः भारतसर्वकारस्य मानवसंसाधनविकास-राज्यमन्त्रिणः मान्यस्य डॉ. सत्यपालसिंहमहोदयस्य मुख्यातिथ्ये, उत्तराखण्डसर्वकारस्य उच्चशिक्षामन्त्रिणः डॉ. धनसिंहरावतवर्यस्य सारस्वतातिथ्ये, देवप्रयाग-विधानसभाक्षेत्रस्य विधायकस्य श्रीमतः विनोद-कण्डारिवर्यस्य, पौडीविधानसभाक्षेत्रस्य विधायकस्य श्रीमुकेशकोलिमहोदयस्य, केन्द्रीयलोकनिर्माण-विभागस्य मुख्याभियन्तुः श्री एस.पी. भारद्वाजवर्यस्य, सहायकाभियन्तुः श्री आर.पी. यादववर्यस्य च विशिष्टातिथ्ये परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडुमहोदयस्य चाध्यक्ष्ये समपद्यत। अवसरेऽस्मिन् केन्द्रीयमानवसंसाधनविकासराज्यमन्त्रिणा डॉ. सत्यपालसिंहवर्येण उक्तं यद् भारतीयसंस्कृतेः आधारभूतायाः देववाण्याः संस्कृतभाषायाः सर्वतोमुखविकासाय वर्तमानसर्वकारः कृतसङ्कल्पो वर्तते। राष्ट्रियसंस्कृतसंस्थानस्य नवनिर्मितोऽयं परिसरः संस्कृताध्येतृणां शास्त्राध्ययने संस्कृतक्षेत्रे अनुसन्धानकर्मणि च रूचिमुत्पादयितुं तेभ्यः संस्कृतस्य सर्वविधं प्रकृष्टं ज्ञानं प्रदातुम् उत्तराखण्डराज्ये संस्कृतशिक्षायाः प्रसारे च नूनमेव समर्थो भविष्यति इति। कार्यक्रमस्य सारस्वतातिथिः उत्तराखण्डशासनस्य उच्चशिक्षामन्त्री डॉ. धनसिंहरावतवर्य्यः अवदद् यत् अस्यां पवित्रायां सङ्गमभूमौ विद्यमानात् श्रीरघुनाथकीर्तिपरिसरात् संस्कृतज्ञानगङ्गा समग्रमपि विश्वं पवित्रीकरिष्यितीति तदर्थं राज्यसर्वकारोऽपि यथापेक्षितं सर्वविधसौकर्यं परिकल्पयितुं सज्जोऽस्ति। अवसरेऽस्मिन् देवप्रयागविधानसभायाः विधायकः श्रीमान् विनोदकण्डारी, पौडीविधायकः श्रीमुकेशकोली अपि समुपस्थितान् संस्कृतानुरागिणः समबोधयताम्। केन्द्रीयलोकनिर्माणविभागस्य मुख्याभियन्ता श्रीमान् एस.सी. भारद्वाजमहोदयः अकथयद् यद् वर्षद्वये परिसरस्य सर्वेषामपि भवनानां निर्माणकार्यं सम्पूर्णं भविष्यति। इदमिदानीं परिसरस्य प्राकार-भित्तिनिर्माणं सम्पन्नमिति। कार्यक्रमे आध्यक्ष्यं निर्वहन् प्राचार्यवर्यः प्रो. के.बी. सुब्बरायुडुवर्यः समेभ्यः अतिथिभ्यः धन्यवादान् व्याहरत्। प्रास्ताविकं भाषणं परिसरस्य व्याकरणविभागाध्यक्षेण प्रो. बनमालीबिश्वालवर्येण विहितम्। कार्यक्रमसञ्चालनं डॉ. मुकेशकुमारः कृतवान् अपि च डॉ. आर. बालमुरूगन् धन्यवादज्ञापनमकरोत्। शिलान्यासकार्यक्रमस्य अङ्गतया देवप्रयाग-नगरस्थैः विविधैः विद्यालयच्छात्रैः सांस्कृतिककार्यक्रमाः प्रस्तुताः। अवसरेऽस्मिन् डॉ. प्रफुल्लगडपालः, डॉ. अरविन्दगौरः, डॉ. मनीषजुगरानः, डॉ. शैलेन्द्रप्रसादः, डॉ. वीरेन्द्रबर्त्वालः, डॉ. सुरेशशर्मा, श्रीपङ्कजकोटियालः, श्रीओमशर्मा, केन्द्रीयलोकनिर्माणविभागस्य अधिकारिणः अभियन्तारः परिसरच्छात्राः नगरस्य गणमान्याश्च सहस्राधिकजनाः समुपस्थिताः आसन्।



शिलान्यासं कुर्वन्तः अतिथयः विद्वांसश्च

## आधुनिकसंस्कृतसाहित्यसंसाधनकेन्द्रस्य शुभोद्घाटनम्

प्रो. बनमालीबिश्वालस्य मार्गदर्शने परिसरस्य पुस्तकालयान्तर्गते प्रतिष्ठितस्य 'आधुनिकसंस्कृतसाहित्यसंसाधनकेन्द्र'स्य उद्घाटनं शिलान्यास-समारोहस्य मुख्यातिथीनां डॉ. सत्यपालसिंहमहोदयानां करकमलयोः सम्पन्नम्। अस्मिन् केन्द्रे आधुनिक-संस्कृतसाहित्यसम्बद्धानां समेषां सर्जनात्मक - समीक्षात्मक-ग्रन्थानां सामग्रिकं संकलनम् अनुसन्धानं च सम्पत्स्यते। एतत्केन्द्रमाध्यमेन आधुनिक-संस्कृत-साहित्य-गवेषणाक्षेत्रे नूतना आयामाः समुद्घाटिताः भविष्यन्ति।



आधुनिकसंस्कृतसाहित्यसंसाधनकेन्द्रस्य फलकम्

## प्रतिस्पन्दः



०८.११.२०१७तमे दिनाङ्के राज्यस्तरीय-शास्त्रीय-स्पर्धावसरे राष्ट्रिसंस्कृतसंस्थानस्य रघुनाथ-वार्तावल्या ३-४ अङ्कौ समासाद्य आद्यन्तं पठितवान्। मुखपृष्ठे प्रकाशितं देवप्रयाग-सङ्गमचित्रं चित्तमावर्जयति। पत्रिकास्थः साहित्यखण्डः छात्राध्यापकानां कारयित्रीं प्रतिभां द्योतयन्ति। पं. मुरलीधरशास्त्रिणः "श्रीवदरीशसुप्रभातम्" भक्तिमयं वातावरणं निर्मातुं नितरां प्रभवति।

शुभेच्छुः
**डॉ. विनोदकुमारदीक्षितः**
बाबा-राघवदास-भगवानदास-स्नातकोत्तरमहाविद्यालयः,
आश्रमवरहजम्, देवरिया (उ.प्र.)

# समायोजितः संस्कृतसप्ताहमहोत्सवः

प्रतिवर्षं श्रावणीपूर्णिमावसरे भारतवर्षे समेषु संस्कृतशिक्षासंस्थानेषु महतोल्लासेन संस्कृतसप्ताहमहोत्सवः समायोज्यते। ऐषमोऽपि श्रीरघुनाथकीर्तिपरिसरे अगस्टमासस्य ४ दिनाङ्कात् १० दिनाङ्कपर्यन्तं संस्कृतसप्ताहमहोत्सवः महता वैभवेन समायोजितः। संस्कृतसप्ताह-महोत्सवस्य उद्घाटनकार्यक्रमः अगस्टमासस्य चतुर्थे दिनाङ्के उत्तराखण्डविधानसभायाः माननीयाध्यक्षाणां श्रीमतां प्रेमचन्द-अग्रवालवर्याणां मुख्यातिथ्ये, संस्कृतभारत्याः पश्चिमोत्तर-उत्तरप्रदेशक्षेत्रस्य क्षेत्रीयसंघटनमन्त्रिणां श्रीमतां प्रतापसिंहमहोदयानां विशिष्टातिथ्ये, परिसरप्राचार्याणां प्रो. के.बी.सुब्बरायुडुवर्याणाञ्च आध्यक्ष्ये सुसम्पन्नः।



संस्कृतसप्ताहमहोत्सवस्य उद्घाटनकार्यक्रमे भाषमाणः प्रेमचन्द-अग्रवालः



संस्कृतसप्ताहमहोत्सवे प्रचलितासु स्पर्धासु निर्णायकत्वेन निरीक्षमाणाः प्रो. के.बी.सुब्बरायुडुः प्रो. बनमालीबिश्वालः डा. प्रफुल्लगडपालश्च

अवसरेऽस्मिन् विधानसभाध्यक्षाः श्रीमन्तः प्रेमचन्द-अग्रवालमहोदयाः समुपस्थितान् सभ्यान् संस्कृतज्ञांश्च सम्बोधयन् अकथयन् यत् संस्कृतभाषा अस्माकं प्राचीनभारतीयजीवनपरम्परायाः संरक्षिका संवाहिका च वर्तते। अस्याः देवभाषायाः सर्वतोमुख-विकासाय अस्माभिः समैरपि सम्भूय प्रयतनीयम्। कार्यक्रमस्य विशिष्टातिथयः श्रीमन्तः प्रतापसिंहमहोदयाः सभां सम्बोधयन्तः अवदन् यत् शिक्षाकेन्द्रपरिमिता भाषा जनभाषात्वेन प्रतिष्ठापयितुं न शक्यते तदर्थं संस्कृतस्य शिक्षाकेन्द्राददतिरिच्य समाजेऽपि प्रचारः प्रसारश्चावश्यकः, समाजे च संस्कृतविषयिणी जागृतिरपि आवश्यकी, संस्कृतसप्ताहमहोत्सवः एतद्द्वयमपि साधयति। कार्यक्रमाध्यक्षैः परिसरप्राचार्यैः अवसरेऽस्मिन् उक्तं यत् राष्ट्रियसंस्कृतसंस्थानस्यायं श्रीरघुनाथ-कीर्तिपरिसरः संस्कृतभाषायाः संस्कृतशास्त्राणाञ्च सर्वतोमुखविकासाय कृतसङ्कल्पो वर्तते, आगामिनि काले अस्य सकारात्मकाः परिणामाः भविष्यन्ति।


संस्कृतसप्ताहमहोत्सवे प्रचलितायां भाषणस्पर्धायां भाषमाणः विद्यार्थी मञ्चे दृश्यन्ते निर्णायकाः अतिथयश्च

संस्कृतभाषां, तत्साहित्यं, तच्छास्त्रपरम्परां, भारतीयसंस्कृतिं च प्रोत्साहयितुम् अवसरेऽस्मिन् संस्कृतभाषण-सुभाषितकण्ठपाठ-संस्कृतनिबन्धलेखन-समूहगानादयः विविधाः स्पर्धाः आयोजिताः, यासु परिसरीयाः तथा देवप्रयागनगरस्थानां नैकेषां विद्यालयानां छात्राः भागं गृहीतवन्तः। तासु तासु प्रतियोगितासु नैके परिसरीयाः अन्ये च देवप्रयागीयाः छात्राः पुरस्काराय विविधनिर्णायकसमितिभिः चिताः अभूवन्।

अगस्टमासस्य दशमे दिनाङ्के परिसरे संस्कृतसप्ताहमहोत्सवस्य सम्पूर्तिसमारोहः देवप्रयाग-विधानसभायाः मान्यविधायकस्य श्रीमतः विनोदकण्डारिवर्यस्य मुख्यातिथ्ये, व्याकरणविभागाध्यक्षस्य प्रो. बनमालीबिश्वालवर्यस्य विशिष्टातिथ्ये, परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडुवर्यस्य आध्यक्ष्ये च सम्पन्नः।

अवसरेऽस्मिन् मुख्यातिथिः श्रीमान् विनोदकण्डारी अवदद् यत् उत्तराखण्डसर्वकारः संस्कृतभाषायाः विकासाय सततं प्रयतमानो वर्तते। राष्ट्रियसंस्कृतसंस्थानस्य नवपरिसरस्य उद्घाटनेन संस्कृतस्य विकास इतोऽपि द्रुतगत्या भविष्यतीति। कार्यक्रमस्य विशिष्टातिथिः प्रो. बनमालीबिश्वालमहोदयः उक्तवान् यत् संस्कृतभाषा वैज्ञानिकी भाषा वर्तते, यत्र एकैकस्यापि वर्णस्य निर्दिष्टोच्चारणस्थानादेव उच्चारणं क्रियते। अतः अस्माभिः अनया भाषया एव सम्भाषणार्थं प्रयतनीयतम्। कार्यक्रमे आध्यक्ष्यं निर्वहन् प्रो. सुब्बरायुडु-महोदयः सभां सम्बोधितवान् यत् सर्वैः संस्कृतानुरागिभिः संस्कृतसम्भाषणशीलैः भवितव्यम्, संस्कृतम् अधीयानैः छात्रैः, अध्यापयद्भिः शिक्षकैश्च अनिवार्यतया संस्कृतेनैव सम्भाषणं करणीयम्, तदैव संस्कृतसप्ताहस्य आयोजनं सार्थकं भविष्यतीति।

अवसरेऽस्मिन् डॉ. आर. बालमुरुगन्, डॉ. प्रफुल्लगडपालः, डॉ. शैलेन्द्रप्रसादउनियालः, डॉ. मुकेशकुमारः, डॉ. सुरेशशर्मा, डॉ. वीरेन्द्रबर्त्वालः, डॉ. अरविन्दगौरः, श्रीश्रीओम्शर्मा, पङ्कज-कोटियालः, श्रीविनोदपण्डितः चेत्यादयः नैके संस्कृतानुरागिणः समुपस्थिता आसन्। मञ्चसञ्चालनं डा. मनीषजुगरानेन विहितम्।



संस्कृतसप्ताहमहोत्सवसम्पूर्तिसमारोहे भाषमाणः विधायकः श्रीविनोदकण्डारी, मञ्चे च दृश्येते प्रो. के.बी.सुब्बरायुडुः प्रो. बनमालीबिश्वालश्च

## समाचरितः एकसप्ततितमः स्वातन्त्र्यदिवसोत्सवः

देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे ऐषमः एकसप्ततितमः स्वातन्त्र्यदिवसोत्सवः महतोल्लासेन समाचरितः। अवसरेऽस्मिन् परिसरप्राचार्येण आचार्येण के. बी.सुब्बरायुडुवर्येण परिसरप्राङ्गणे ध्वजारोहणं विधाय स्वातन्त्र्याय हुतात्मनां नैकेषां वीरपुरूषाणां जीवनप्रसङ्गमादाय समेऽपि छात्राः परिसरसदस्याश्च सम्बोधिताः।

राष्ट्रियपर्वण्यस्मिन् परिसरच्छात्रैः देशभक्तिभावसम्पूरिताः नैकविधाः सांस्कृतिकाः गीत-नाट्य-भाषणादि-कार्यक्रमाः प्रस्तुताः। परिसरीयैः कैश्चित् छात्रैः अवसरेऽस्मिन् राष्ट्रस्वातन्त्र्यविषये एकं नाटकमपि प्रस्तुतम्।

अवसरेऽस्मिन् व्याकरणविभागाध्यक्षः आचार्यः बनमालीबिश्वालवर्यः, साहित्यविभागाध्यक्षः डा. प्रफुल्लगडपालवर्यः, न्याय-विभागाध्यक्षः डा. आर. बालमुरुगनवर्यः, डा. मनीषजुगरानः, श्रीसन्दीपरावतः, डॉ. वीरेन्द्रबर्त्वालः, डॉ. अरविन्दगौरः, श्रीश्रीओम्शर्मा, डा. शैलेन्द्र-उनियालश्चेत्यादयः स्वीयविचारान् समुपस्थापयन्। एवं देवप्रयागस्थेऽस्मिन् श्रीरघुनाथकीर्तिपरिसरे महता उल्लासेन अयम् एकसप्ततितमः स्वातन्त्र्यदिवसोत्सवः समाचरितः।

## पञ्चदशे नाट्यमहोत्सवे भागग्रहणम्

राष्ट्रियसंस्कृतसंस्थानद्वारा त्रिपुराराज्यस्य राजधान्याम् अगरतलायाम् एकलव्यपरिसरे नवम्बर-मासस्य २२तः २४ दिनाङ्कपर्यन्तम् आयोजिते पञ्चदशे नाट्यमहोत्सवे श्रीरघुनाथकीर्तिपरिसरस्य नाट्यदलेन श्रीकविदिवाकरविरचितं "लक्ष्मीमानवेदम्" इति नाटकं प्रस्तुतम्।



नाट्यमहोत्सवावसरस्य किञ्चन समूहचित्रम्

अस्मिन् महोत्सवे परिसरस्य आचार्यप्रथमवर्षस्य छात्रः रोहितकुमारः प्रथमं स्थानम्, आचार्यप्रथमवर्षस्य छात्रा सुश्रीमुक्ताउपाध्यायः द्वितीयम्, शास्त्रिद्वितीयवर्षस्य छात्रा प्राची च तृतीयं स्थानमवाप्नोत्। नाट्यदलस्य मार्गदर्शकत्वेन प्रो. बनमालीविश्वालः, डॉ. मुकेशशर्मा, श्रीपङ्कज-कोटियालः, डॉ. राकेशभट्टवर्याश्च समुपस्थिताः आसन्। अस्मिन् अवसरे परिसरीया नाट्यप्रस्तुतिः समुपस्थितैः दर्शकैः प्रशंसिता।

## परिसरीयच्छात्राणाम् उपलब्धिः

श्रीरघुनाथकीर्तिपरिसरस्य अधोलिखितैः चतुर्भिः छात्रैः नवम्बरमासे केन्द्रीयविद्यालयसंघटनद्वारा आयोजिता यू.जी.सी. नेट परीक्षा उत्तीर्णा–

| | | | |
|---|---|---|---|
| **देवेन्द्रपोखरियालः** | (शोधच्छात्रः, साहित्यशास्त्रम्) | **हरीशडङ्गवालः** | (शोधच्छात्रः, व्याकरणशास्त्रम्) |
| **मधुसूदनसती** | (शोधच्छात्रः, साहित्यशास्त्रम्) | **पङ्कजः** | (आचार्यप्रथमवर्षीयछात्रः, साहित्यशास्त्रम्) |

## विविध-स्तरीय-संस्कृतस्पर्धासु परिसरच्छात्राणां प्रातिनिध्यम्

उत्तराखण्डसंस्कृत-अकादमीद्वारा अगस्टमासस्य २४-२५ दिनाङ्कयोः पौडीजनपदस्य कोटखण्डे आयोजितासु खण्डस्तरीय-संस्कृतस्पर्धासु संस्कृतसमूहनृत्य-समूहगान-वादविवाद-आशुभाषणस्पर्धासु परिसरच्छात्रैः प्रथमं, संस्कृतनाटकश्लोकोच्चारणस्पर्धयोश्च द्वितीयं स्थानं लब्धम्।


खण्डस्तरीयनाटकस्पर्धायाम् अभिनयं कुर्वन्तौ परिसरछात्रौ

पौडीजनपदस्य श्रीदयानन्द-उच्चतरमाध्यमिकविद्यालये सेप्टेम्बरमासस्य ८-९ दिनाङ्कयोः आयोजितासु जनपदस्तरीयस्पर्धासु परिसरच्छात्रैः समूहगान-संस्कृतश्लोकोच्चारणस्पर्धयोः प्रथमं वादविवाद-आशुभाषणसंस्कृतनाटकस्पर्धासु च द्वितीयस्थानं प्राप्तम्। आसु स्पर्धासु डा. मुकेशकुमारः, डा. मनीषजुगरानः, डा. वीरेन्द्रबर्त्वालः, श्रीपङ्कजकोटियालश्चेत्यादयः छात्राणां मार्गदर्शनमकुर्वन्।

## प्रदेशस्तरीय-सामूहिकगानस्पर्धायां भागग्रहणम्

उत्तराखण्ड-संस्कृत-अकादमीद्वारा हरिद्वारे आयोजितासु विविधस्तरीय-संस्कृत-आशुभाषण-संघनृत्य-वादविवाद-नाटक-श्लोकवाचन-समूहगानादिषु राज्यस्तरीय-स्पर्धासु चतसृषु स्पर्धासु परिसरच्छात्रैः भागः गृहीतः। तत्र च समूहगानस्पर्धायां परिसरदलेन तृतीयस्थानं लब्धम्। आसु स्पर्धासु डॉ. मुकेशशर्मा डा. वीरेन्द्रबर्त्वालश्च छात्राणां मार्गदर्शनं कृतवन्तौ।

## समायोजितः हिन्दीपक्षोत्सवः

श्रीरघुनाथकीर्तिपरिसरे सितम्बरमासस्य चतुर्दशदिनाङ्काद् अष्टाविंशतिदिनाङ्कं यावद् हिन्दीपक्षोत्सवः समाचरितः। अवसरेऽमिन् मुख्यातिथित्वेन समागतः उत्तराखण्डसंस्कृतविश्वविद्यालयस्य हिन्दीविभागाध्यक्षः प्रो. दिनेशचमोला अकथयत् यद् हिन्दी न केवलं भाषा अपितु भारतीयतायाः गौरवभूता वर्तते। हिन्दी अस्माकं संस्कृतेः परिचायिकाऽपि वर्तते। यद्यपि एतदीयं स्वरूपं प्राक्तनापेक्षया परिवर्तितं वर्तते तथापि अस्याः भविष्यम् अत्यन्तमुज्जवलं वर्तते। कार्यक्रमस्य विशिष्टातिथिः परिसरस्य व्याकरणविभागाध्यक्षः प्रो. बनमालीबिश्वालः उक्तवान् यत् संस्कृत-भाषा भारतीयसंस्कृतेः संरक्षिकाऽस्ति। तत्सुतात्वेन प्रथिता हिन्दीभाषा तस्याः संवाहिका विद्यते। तुलसीदास-सुरदासप्रभृतिभिः कविभिः संस्कृतशास्त्रेषु विद्यमाना विचाराः हिन्दीभाषामाध्यमेन सर्वत्र प्रसारिताः। परिसरस्य हिन्दीप्राध्यापकः कार्यक्रमसंयोजकश्च डॉ. वीरेन्द्रबर्त्वालः अकथयत् यत् संस्थानपरिसरे अधीयानानां छात्राणां हिन्दीभाषायां महती रुचिः वर्तते। अस्मच्छात्राः हिन्दीभाषायां कवितां गद्यं मौलिकलेखांश्च लेखितुं समर्थाः भवेयुः। तदर्थं हिन्दीपक्षावसरे नैकविधाः स्पर्धाः परिसरे आयोज्यन्ते। कार्यक्रमस्य अध्यक्षः परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुवर्यः अकथयत् यत् संस्कृतम् अधीयानानां परिसरीयच्छात्राणां हिन्दीलेखनेऽपि महती रुचिः वर्तते। हिन्दीपक्षस्यावसरे समैरपि छात्रैः उत्कृष्टं प्रदर्शनं विहितम्।



हिन्दीपक्षोत्सवस्य उद्घाटनकार्यक्रमस्य किञ्चन दृश्यम्

हिन्दीपक्षस्यावसरे परिसरे स्व-रचना, वादविवादः, शुद्धलेखनञ्चेत्यादयः तिस्रः स्पर्धा आयोजिताः। आसु स्पर्धासु लब्धस्थानाः छात्राः अतिथिभिः पुरस्कृताः। स्वरचनास्पर्धायां शास्त्रिप्रथमवर्षस्य छात्रः रोहितकोठारी प्रथमं स्थानम्, आचार्यप्रथमवर्षीयश्छात्रः पङ्कजः द्वितीयम्, आचार्यप्रथम-वर्षीयश्छात्रः बालकृष्णसेमवालः तृतीयं स्थानम्, प्राचीनौटियालश्च चतुर्थं स्थानमलभन्त। वादविवादस्पर्धायाम् आचार्यप्रथमवर्षीयश्छात्रः पङ्कजः, प्राचीनौटियालः, शोभितनौटियालः, रोहितकोठारी च क्रमशः प्रथमं, द्वितीयं, तृतीयं चतुर्थञ्च पुरुस्कारमलभन्त। शुद्धलेखनस्पर्धायां सन्दीपकोठारी, श्यामदेवः, नकुलः, पङ्कजश्च क्रमशः प्रथमं द्वितीयं तृतीयं चतुर्थञ्च पुरस्कारं प्राप्तवन्तः। अवसरेऽस्मिन् डा. आर. बालमुरूगन्, डॉ. प्रफुल्लगडपालः, डॉ. मनीषजुगरानः, डॉ. मुकेशशर्मा, डॉ. सुरेशशर्मा, डॉ. अरविन्दगौरः, डॉ. शैलेन्द्रउनियाल, श्रीपङ्कजकोटियालः श्रीश्रीओमशर्मा चेत्यादयः समुपस्थिताः आसन्।



हिन्दीपक्षोत्सवस्य सम्पूर्तिसमारोहे मुख्यातिथिं सम्मानयन् परिसरप्राचार्यः

## परिसरे समायोक्ष्येते व्याकरण-साहित्यशास्त्रीये अन्ताराष्ट्रियसङ्गोष्ठ्यौ




श्रीरघुनाथकीर्तिपरिसरे फरवरीमासस्य २-३ दिनाङ्कयोः 'बौद्धवैयाकरणानां संस्कृतव्याकरणपरम्परायां योगदानम्' इति विषयिणी व्याकरणशास्त्रीया अन्ताराष्ट्रियशोधसङ्गोष्ठी समायोक्ष्यते। अपि च ४-५ दिनाङ्कयोः 'बौद्धमिश्रितसंस्कृतसाहित्यस्य वैश्विकसन्देशः' इति विषयमवलम्ब्य साहित्यशास्त्रीया अन्ताराष्ट्रियशोधसङ्गोष्ठी भविष्यति। अनयोः सङ्गोष्ठ्योः देशस्य नानाकोणेभ्यः विविधविश्वविद्यालयेभ्यश्चः प्राध्यापकाः शोधच्छात्राः विद्वांसश्च भागं ग्रहीष्यन्ति। सङ्गोष्ठीसम्बद्धं विस्तृतं विवरणं परिसरस्य अन्तर्जालपुटे www.srkcampus.org इत्यत्र सभुपलब्धं वर्तते।

## परिसरे समुद्घाटयिष्यते बौद्धसंस्कृतसाहित्यसंसाधनकेन्द्रम्

राष्ट्रिय-संस्कृत-संस्थानस्य अस्मिन् अभिनवे श्रीरघुनाथकीर्तिपरिसरे फरवरीमासस्य ४-५ दिनाङ्कयोः 'बौद्धमिश्रितसंस्कृतसाहित्यस्य वैश्विकसन्देशः' इति विषयमवलम्ब्य भविष्यमाणायां साहित्यशास्त्रीयायाम् अन्ताराष्ट्रियशोधसङ्गोष्ठ्यां बौद्ध-संस्कृतसाहित्यसंसाधनकेन्द्रस्य समुद्घाटनं भविष्यति।

ज्ञातव्यमस्ति यत् डा. प्रफुल्लगडपालस्य मार्गदर्शने अस्मिन् केन्द्रे बौद्धसंस्कृत-साहित्यविषये अनुसन्धान-प्रकाशनादिकार्याणि भविष्यन्तीति।



## समायोक्ष्यन्ते विविधशास्त्रीयाः राष्ट्रियसङ्गोष्ठ्यः

श्रीरघुनाथकीर्तिपरिसरे फरवरीमासे वेद-ज्योतिष-न्याय-वेदान्त-आधुनिकविभागीयाः राष्ट्रियसङ्गोष्ठ्यः समायोक्ष्यन्ते। 'वेदस्मृत्योः धर्मादिविचारः' इति विषयमधिकृत्य वेदविभागीया, 'ज्योतिष-दर्शनयोः' अन्तःसम्बन्धः' इति विषयिणी ज्यौतिषविभागीया, 'आधुनिकयुगे वेदान्तशास्त्रस्य उपयोगिता' इति विषयिणी वेदान्तविभागीया, 'पदवृत्तिविचारः' इति विषयिणी न्यायविभागीया, 'भारतीय समाज का प्रतिबिम्बन-(ऐतिहासिक और साहित्यिक सन्दर्भ में)' इति विषयिणी आधुनिकविभागीया चेत्यादयः राष्ट्रियसङ्गोष्ठ्यः आयोजयिष्यन्ते। यत्र विभिन्नेभ्यः प्रदेशभ्यः विश्वविद्यालयेभ्यश्च विद्वांसः प्राध्यापकाः शोधच्छात्राश्च भागं ग्रहीष्यन्ति।

## परिसरे समायोक्ष्यन्ते विविधशास्त्रीयव्याख्यानानि

श्रीरघुनाथकीर्तिपरिसरे फरवरीमासे वेद-व्याकरण-साहित्य-न्याय-वेदान्त-ज्योतिष-आधुनिकशास्त्राणि समवलम्ब्य षट्-शास्त्रीय-व्याख्यानानि भविष्यन्ति, यत्र तत्तच्छास्त्रनिष्णाताः विषयविशेषज्ञाः विद्वांसः व्याख्यानानि प्रस्तोष्यन्ति। व्याख्यानविषयाः अधोलिखिता वर्तन्ते–

| शास्त्रम् | | व्याख्यानविषयः |
|---|---|---|
| वेदः | – | वैदिकस्वराः तेषां प्रयोजनानि च |
| व्याकरणम् | – | शब्दविद्यायां बौद्धाचार्याणां योगदानम् |
| साहित्यम् | – | बौद्धमिश्रितसंस्कृतसाहित्ये अनुवाद-अनुसन्धानयोः सम्भावना |
| वेदान्तः | – | वेदान्तदृष्ट्या वस्त्ववस्तुस्वरूपविमर्शः |
| ज्योतिषम् | – | ज्योतिषदर्शनयोः सम्मतः ब्रह्मस्वरूपविचारः |
| न्यायः | – | न्यायशास्त्रे पदवृत्तिविचारः |
| आधुनिकशास्त्रम् | – | हिन्दी साहित्य में अन्तर्निहित ऐतिहासिक एवं सांस्कृतिक तत्त्व। |

## परिसरे राष्ट्रियसेवायोजनायाः एककः समुद्घाटितः

श्रीरघुनाथकीर्तिपरिसरे राष्ट्रियसेवायोजनायाः (N.S.S.) नवीनः एककः समुद्घाटितः, यत्र परिसरीयाः ५० छात्राः पञ्जीकृताः। सेवायोजनायाः कार्यक्रमाधिकारित्वेन ज्योतिष-विभागास्य प्राध्यापकः डॉ. सुरेशशर्मा नियोजितः।

राष्ट्रियसेवायोजनायाः अङ्गतया परिसरसन्निकटाः **रोड, सौड़, खेडा** चेत्यादयः त्रयः ग्रामाः अभिगृहीताः। राष्ट्रियसेवायोजनायाः अङ्गतया दिसम्बरमासस्य प्रथमदिनाङ्के विश्व-एड्स-दिवसस्य अवसरे **सौडग्रामे** जनजागरणयात्रा आयोजिता, यस्यां कार्यक्रमाधिकारी डॉ. सुरेशशर्मा, हिन्दीप्राध्यापकः डॉ. वीरेन्द्रबर्त्वालः, डॉ. मुकेशशर्माः, श्रीपङ्कज-कोटियालादयः प्राध्यापकाः परिसरच्छात्राश्च भागं गृहीतवन्तः।

## स्पर्शगङ्गादिवसे गङ्गातटे स्वच्छताभियानम्

दिसम्बरमासस्य १७ दिनाङ्के स्पर्शगङ्गादिवसस्य अवसरे परिसरस्य राष्ट्रियसेवायोजनायाः अङ्गतया परिसच्छात्रावासाद् गङ्गायाः स्वच्छताविषये जनजागरणयात्रा आयोजिता तथा च गङ्गातटस्य स्वच्छताऽपि कृता।

अवसरेऽस्मिन् डॉ. सुरेशशर्मा, डॉ. मनीषजुगरानः, डॉ. मुकेशशर्मा, डॉ. वीरेन्द्रबर्त्वालः, श्रीपङ्कजकोटियालादयः प्राध्यापकाः छात्राश्च भागं गृहीतवन्तः।

## विश्वमानवाधिकारदिवसे आयोजिता जागरणयात्रा

विश्वमानवाधिकारदिवसे परिसरस्य राष्ट्रियसेवायोजनायाः अङ्गतया परिसरस्य छात्रावासाद् धर्मपुरग्रामं यावद् जनजागरणयात्रा आयोजिता।

अवसरेऽस्मिन् परिसरस्य व्याकरणविभागाध्यक्षेण प्रो. बनमालीबिश्वालवर्येण उक्तं यत् सर्वैरपि मानवाधिकारान् प्रति जागरूकैः भवितव्यम्। जनजागरणयात्रायां कार्यक्रमाधिकारी डा. सुरेशशर्मा, डॉ. मुकेशशर्मा, डॉ. मनीषजुगरानः, श्रीपंकजकोटियालादयः प्राध्यापकाः परिसरच्छात्राश्च भागं गृहीतवन्तः।



विश्वमानवाधिकारजागरणयात्रायाः किञ्चन दृश्यम्

## समायोजिता: उत्तराखण्डराज्यस्य अधिराज्यीयशास्त्रीयस्पर्धा:

०८.११.२०१७ दिनाङ्कत: १०.११.२०१७ दिनाङ्कपर्यन्तं राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्त्तिपरिसरेण उत्तराखण्डराज्यस्य अधिराज्यीयशास्त्रीयस्पर्धा: आयोजिता:, यत्र उत्तराखण्डराज्यस्य संस्कृतविद्यालयेषु महाविद्यालयेषु गुरुकुलेषु च अधीयाना: छात्रा: शास्त्रकौशलप्रदर्शनाय स्वगुरुभि: साकं समागता:। अधिराज्यीयशास्त्रीयस्पर्धासु षड्विंशति: (२६) शास्त्रीयस्पर्धा अधोलिखितान् विषयानधिकृत्य आयोजिता:–

**भाषणविषया:–**

- व्याकरणभाषणम् – कारकद्वितीयार्थविमर्श:
- साहित्यभाषणम् – उपमा-अलङ्कार:
- ज्योतिषभाषणम् – सूर्यदशाया: शुभाशुभत्वम्
- मीमांसाभाषणम् – प्रमाणमीमांसा
- न्यायशास्त्रभाषणम् – शब्दशक्तिविचार:
- वेदान्तभाषणम् – स्मृत्यधिकरणम्
- धर्मशास्त्रभाषणम् – कार्तिकमासमाहात्म्यम्
- जैनबौद्धदर्शनभाषणम् – बौद्धमतानुसारम् अनुमानप्रमाणविचार:
- वेदभाष्यभाषणम् – वेदानाम् अपौरुषेयत्वम्
- सांख्य-योगभाषणम् – कैवल्यस्वरूपविचार:



राज्यस्तरीयशास्त्रीयस्पर्धाया: उद्घाटनावसरे कार्यक्रमस्य रूपरेखां प्रस्तुवन् प्रो. बनमाली बिश्वाल:

अस्या: अधिराज्यीयस्पर्धाया: उद्घाटनसत्रं वैदिकमन्त्रोच्चारणदीपप्रज्वलनपुरस्सरं समारब्धम्। उद्घाटनसत्रे डा. विनोदकुमारदीक्षितवर्य: मुख्यातिथि: आसीत्, डा. ब्रजभूषणओझा च विशिष्टातिथिरासीत् तथा परिसरप्राचार्य: प्रो. के.बी. सुब्बरायुडुमहोदय: अध्यक्ष आसीत्। अस्मिन्नवसरे मुख्यातिथिमहोदेन डा. विनोदकुमारदीक्षितवर्येण उक्तं यत् संस्कृतस्य समुन्नत्यै, वेदानामुद्धरणाय च संस्कृतस्पर्धानां महती भूमिकाऽस्ति। अथ च विशिष्टातिथिमहोदयेन डा. ब्रजभूषणमहोदयेन उक्तं यत् 'शास्त्रपरम्पराया: संरक्षणार्थं स्पर्धा आवश्यकी भवति। अत: 'स्पर्धया वर्धते विद्या' इत्याभणकं प्रसिद्धमेव वर्तते' इति।



शास्त्रीयस्पर्धासु पुरस्कृता: प्रतिभागिन:

आसु स्पर्धासु निर्णायकरूपेण काशीहिन्दूविश्वविद्यालयवाराणसीत: संस्कृतधर्मसंकायविज्ञानस्य प्राध्यापक: डा. ब्रजभूषणमहोदय:, रा.सं.सं. जयपुरपरिसरात् शिक्षाशास्त्रविभागाध्यक्ष: प्रो. वाई.एस. रमेशमहोदय:, गोरखपुरविश्वविद्यालयात् संस्कृतविभागस्य आचार्य: डा.विनोदकुमारदीक्षितमहोदय: तथा श्रीभगवानदाससंस्कृतादर्शविद्यालयस्य साहित्यविभागाध्यक्ष: डा. निरञ्जनमिश्रमहोदयश्च परिसरम् अनुगृहीतवन्त:। एवमेवात्र स्पर्धायां परिसरप्राचार्य: तथा विभिन्नविभागानां निम्नलिखिता: परिसरीयप्राध्यापका अपि विविधस्पर्धासु निर्णायकदायित्वं निरवहन्–

१. प्रो. बनमालीबिश्वाल: (व्याकरणविभागाध्यक्ष:)
२. डा. आर. बालमुरुगन् (न्यायविभागाध्यक्ष:)
३. डा. प्रफुल्लगडपाल: (साहित्यविभागाध्यक्ष:)
४. डा. मुकेशशर्मा (प्राध्यापक: ज्यौतिषविभागे)
५. डा. मनीषजुगरान: (प्राध्यापक: साहित्यविभागे)
६. श्री श्रीओमशर्मा (प्राध्यापक: व्याकरणविभागे)
७. डा. सुरेशशर्मा (प्राध्यापक: ज्यौतिषविभागे)

१०.११.२०१७ तमे दिनाङ्के आसां स्पर्धानां समारोपकार्यक्रम: समाचरित:। अयं समापनकार्यक्रम: परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडुमहोदयस्य आध्यक्षे पूर्णतामगात्। अवसरेऽस्मिन् प्राचार्येण उक्तं यत्–'विजेतृणां समेषां छात्राणां कृते शुभकामना वर्त्तते यत्ते अखिलभारतीयशास्त्रीयस्पर्धायामपि उत्तमतया प्रदर्शनं कुर्यु'रिति। तत: मुख्यातिथिमहोदयेन डा. विनोदकुमारदीक्षितेन उक्तं यत्– सफलता परिश्रमेण विना न प्राप्यते अत: भवन्त: सर्वेऽपि साफल्याय श्रमं कर्त्तुं कटिबद्धा भवन्तु। तत: विशिष्टातिथिना प्रो. वाई.एस्. रमेशमहोदयेन उक्तं यद् यद्यपि स्पर्धालूनां प्रदर्शनमुत्तममासीत् तथापि नूनमेव भाषणे इतोऽपि परिष्कार: अपेक्ष्यते। एवमेवान्ते सारस्वतातिथिना-डा. निरञ्जनमिश्रमहोदयेन उक्तं यत् छात्रा: अनया स्पर्धया प्रेरिता: स्वाध्यायोत्सुका: भविष्यन्ति। अस्या: अधिराज्यीयस्पर्धाया: संयोजनं व्याकरणविभागाध्यक्षेण प्रो. बनमालीबिश्वालवर्येण विहितम् तथा सहसंयोजनदायित्वं च ज्यौतिषाध्यापकेन मुकेशशर्मणा विहितम्। अस्मिन्नवसरे समागता अतिथय: तथा समेऽपि परिसरप्राध्यापकाश्च छात्राणां कृते शुभकामनामददु:।

## अधिराज्यीयशास्त्रीयस्पर्धासु अखिलभारतीयस्पर्धार्थं चितानां प्रतिभागिनाम् आवलिः

| क्र.स. | स्पर्धाया नाम | विजेतृनाम | संस्थानाम ( सङ्केतः संक्षेपेण ) |
|---|---|---|---|
| १. | व्याकरणभाषणम् | ------------- | ---------------- |
| २. | साहित्यभाषणम् | पङ्कजः | राष्ट्रियसंस्कृतसंस्थानम्, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः |
| ३. | न्यायभाषणम् | ------------- | -------------- |
| ४. | साङ्ख्य-योगभाषणम् | राजेशपोखरिया | श्रीभगवानदास-आदर्शसंस्कृत-महाविद्यालयः, हरिद्वारम् |
| ५. | मीमांसाभाषणम् | ------------- | ----------- |
| ६. | वेदान्तभाषणम् | ------------- | ------------------ |
| ७. | धर्मशास्त्रभाषणम् | गंगाशरणः | राष्ट्रियसंस्कृतसंस्थानम्, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः |
| ८. | ज्यौतिषभाषणम् | नीरजकुमारः | राष्ट्रियसंस्कृतसंस्थानम्, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः |
| ९. | जैन-बौद्धभाषणम् | ------------ | -------- |
| १०. | वेदभाष्यभाषणम् | ------------ | -------- |
| ११. | साहित्यशलाका | भुवनेशनौडियालः | श्रीभगवानदास-आदर्शसंस्कृतमहाविद्यालयः, हरिद्वारम् |
| १२. | व्याकरणशलाका | देवकी साहू | वैदिककन्यागुरुकुलम्, पतञ्जलियोगपीठम्, हरिद्वारम् |
| १३. | न्यायशलाका | ------------ | -------- |
| १४. | सिद्धान्तज्यौतिषशलाका | ------------- | -------- |
| १५. | वेदान्तशलाका | राधिका | वैदिककन्यागुरुकुलम्, पतञ्जलियोगपीठम्, हरिद्वारम् |
| १६. | पुराणेतिहासशलाका | संगीता | वैदिककन्यागुरुकुलम्, पतञ्जलियोगपीठम्, हरिद्वारम् |
| १७. | मीमांसाशलाका | ----------- | -------- |
| १८. | काव्यकण्ठपाठः | ------------- | -------- |
| १९. | अमरकोषकण्ठपाठः | कैलाशः | श्रीमद्दयानन्द आर्षज्योतिर्मठगुरुकुलम्, देहरादूनम् |
| २०. | अष्टाध्यायीकण्ठपाठः | प्राचीनौटियालः | राष्ट्रियसंस्कृतसंस्थानम्, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः |
| २१. | धातुरूपकण्ठपाठः | सारांशः | श्रीमद्दयानन्द आर्षज्योतिर्मठगुरुकुलम्, देहरादूनम् |
| २२. | शास्त्रार्थविचारः | हरीशडंगवालः | राष्ट्रियसंस्कृतसंस्थानम्, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः |
| | | देवेन्द्रपोखरियालः | राष्ट्रियसंस्कृतसंस्थानम्, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः |
| २३. | समस्यापूर्तिः | पङ्कजः | राष्ट्रियसंस्कृतसंस्थानम्, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः |
| २४. | अक्षरश्लोकी | सत्यप्रकाशः | श्रीमद्दयानन्द आर्षज्योतिर्मठगुरुकुलम्, देहरादूनम् |
| २५. | शास्त्रीयस्फूर्तिस्पर्धा | हरीशडंगवालः | राष्ट्रियसंस्कृतसंस्थानम्, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः |
| | | देवेन्द्रपोखरियालः | राष्ट्रियसंस्कृतसंस्थानम्, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः |
| २६. | भगवद्गीताकण्ठपाठः | नारायणः | संस्कृतगुरुकुलम्, देवप्रयागः |

परिणामः

## परिसरीय-विदुषां शैक्षिकाः उपलब्धयः गतिविधयश्च

**१. प्रो. के.बी. सब्बरायुडु ( प्राचार्यः )**

- जुलैमासस्य सप्तमे दिनाङ्के उत्तराखण्डसंस्कृतविश्वविद्यालयस्य उपवेशने भागग्रहणम्।
- जुलैमासस्य त्रयोदशदिनाङ्के संस्थानमुख्यालये कार्यालयकार्यार्थं गमनम्।
- अगस्टमासस्य २४ तमे दिनाङ्के वेदान्तविभागे सहायकाचार्यपदस्य चयनसमितेः उपवेशने भागग्रहणम्।
- सेप्टेम्बरमासे राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः (NAAC) समितिसदस्यत्वेन निरीक्षणम्।
- अक्टोबर्मासे आदर्शमहाविद्यालयानां निरीक्षणम्।
- अक्टोबर्मासे उत्तराखण्डसंस्कृत-अकादम्याः राज्यस्तरीयस्पर्धायां मुख्यातिथित्वेन सहभागिता।
- नवम्बरमासे अगरतलाया एकलव्यपरिसरे नाट्योत्सवे भागग्रहणम्।

**२. प्रो. बनमाली बिश्वालः**

- ०९.०९.२०१७ दिनाङ्कात् १०.०९.२०१७ दिनाङ्कं यावद् बिहारस्थया अयाचीमिश्रसमित्या दरभंगायाम् आयोजितायां द्विदिनात्मिकायां विद्वत्संगोष्ठ्यां १०.०९.२०१७ तमे दिनाङ्के शङ्करमिश्रस्य रसार्णवे काव्यतत्त्वानि इति विषयमधिकृत्य व्याख्यानं प्रदत्तवान्।
- ०३.११.२०१७ तमे दिनाङ्के उज्जयिन्यां कालिदास-संस्कृत-अकादम्या आयोजिते अखिलभारतीय-संस्कृत-कविसमवाये काव्यपाठं कृतवान्।
- एतदवधौ डा. रीता त्रिवेदिनः अक्षराख्यस्य संस्कृत-काव्यसंग्रहस्य पुरोवाचं (Foreword) लिखितवान्।
- एतदवधौ कथासरित्-पत्रिकायाश्चतुर्विंशाङ्कस्य सम्पादनं कृतवान्। तत्र च स्वीयाः काश्चन मौलिक्यः अनूदिताश्च कथाः प्रकाशिताः अभवन्।
- एतदवधौ पद्यबन्धाया एकादशाङ्कस्य मुख्यसम्पादकरूपेण सम्पादनं कृतवान्। तत्र च स्वीयाः काश्चन मौलिक्यः अनूदिताश्च कविताः प्रकाशिताः।
- एतदवधौ विविधासु पत्रिकासु, अभिनन्दनग्रन्थेषु च केचन शोधलेखाः अपि प्रकाशिताः।
- एतदवधौ प्रयागस्थे राष्ट्रियसंस्कृतसंस्थानाङ्गभूते श्रीगङ्गानाथझापरिसरे मार्गदर्शने द्वौ शोधच्छात्रौ शोधप्रबन्धं प्रस्तुतवन्तौ।
- एतदवधौ उत्कलविश्वविद्यालयस्य दिल्ली-विश्वविद्यालयस्य च द्वयोः शोधप्रबन्धयोः बाह्यपरीक्षकरूपेण मूल्याङ्कनं कृतवान्।
- सेप्टेम्बर-अक्टूबरमासयोः यथाक्रमं गोरखपुर-विश्वविद्यालये उत्कलविश्वविद्यालये च द्वयोः शोधच्छात्रयोः बाह्यपरीक्षकरूपेण वाक्परीक्षे स्वीकृते।
- Global Society For Health and Educational Growth -इत्यनया संस्थया भारतशिक्षारत्न-सम्मानार्थं मनोनीतः।
- कानाडायां वांकोवर-नगरे आयोज्यमाने सप्तदश-विश्व-संस्कृत-सम्मेलने "काव्यमलङ्कारश्च" इत्यस्मिन् सत्रे प्रस्तुत्यर्थं निर्मितं शोधपत्रं स्वीकृतम्।

**३. डॉ. प्रफुल्लगडपालः**

- विश्वविद्यालयानुदानायोगेन समायोजितायां राष्ट्रियपात्रतापरीक्षायां (नेट इत्यस्यां) पालिविषयेन परीक्षा समुत्तीर्णा।
- ०८.११.२०१७ तः १०.११.२०१७ दिनाङ्कपर्यन्तं परिसरे समायोजितायाम् उत्तराखण्डराज्यस्य अधिराज्यीयशास्त्रीयस्पर्धायां निर्णायकत्वेन दायित्वं निर्व्यूढम्।
- मध्यप्रदेशस्थे BRAUSS इति विश्वविद्यालये पालिविषयस्य शिक्षामण्डलस्य सदस्यत्वेन नियुक्तिः।
- सारल्येन पालिशिक्षणाय पालिविषयस्य सप्त पुस्तकानां रचना विहिता।

**४. डॉ. मनीषजुगरानः**

- जून-जुलैमासयोः प्रयागस्थे श्रीगङ्गानाथझापरिसरे आयोजिते त्रयोविंशतिदिनात्मके अनौपचारिकसंस्कृतशिक्षकाणां प्रशिक्षणवर्गे प्रशिक्षकत्वेन भागग्रहणम्।
- अगस्टमासे उत्तराखण्डसंस्कृत-अकादमीद्वारा आयोजितासु खण्डस्तरीय-जनपदस्तरीयस्पर्धासु परिसरछात्राणां मार्गदर्शनम्।
- उत्तराखण्डसंस्कृत-अकादमीद्वारा आयोजिते जनपदस्तरीयस्पर्धानामुद्घाटनकार्यक्रमे विशिष्टातिथित्वेन उद्बोधनम्।
- नवम्बरमासे विदिशायां (मध्यप्रदेशे) संस्कृतभारतीद्वारा आयोजितायां राष्ट्रियसङ्गोष्ठ्यां भागग्रहणम्।
- नवम्बरमासस्य १४ दिनाङ्कतः २४ दिनाङ्कपर्यन्तं संस्थानमुख्यालये पत्राचारविभागस्य पाठलेखनकार्यशालायां भागग्रहणम्।
- दिसम्बरमासे महर्षिसान्दिपनीवेदविद्याप्रतिष्ठाने (उज्जयिन्याम्) आयोजितायां वेदविषयिण्यां कार्यशालायां भागग्रहणम्।

## ग्रन्थ-लोकार्पणम्

परिसरस्य शिलान्यासकार्यक्रमे समुपस्थितैः अतिथिभिः केचन परिसरीय-ग्रन्थाः पत्रिकाश्च लोकाय अर्पिताः। तत्र च सर्वप्रथमं परिसरीयायाः त्रैमासिकवार्तापत्रिकायाः **'रघुनाथवार्तावली'** इत्यस्याः संयुक्तद्वितीयाङ्कस्य लोकार्पणम् अतिथिभिः विहितम्।




शाब्दी-त्रिपथगायाः लोकार्पणस्य किञ्चन दृश्यम्

अवसरेऽस्मिन् व्याकरणविभागीयशोधपत्रिकायाः **'शाब्दीत्रिपथगा'** इत्यस्याः लोकार्पणमपि सञ्जातम्। सूचनीयमस्ति यत् अयं प्रवेशाङ्कः महाभाष्यविशेषाङ्करूपेण प्रकाशितः। अत्रत्याः लेखाः प्रायः गते वर्षे परिसरे आयोजितायाः व्याकरणविभागीयराष्ट्रियसङ्गोष्ठ्यां विद्वद्भिः प्रस्तुताः आसन्।

अत्र च ज्योतिषविभागस्य प्राध्यापकेन डॉ. सुरेशशर्मणा रचितस्य सिद्धान्तज्योतिषसम्बद्धस्य **'गोलपरिभाषा'** इति ग्रन्थस्यापि लोकार्पणं सम्पन्नम्।




गोलपरिभाषा-ग्रन्थस्य लोकार्पणस्य किञ्चन दृश्यम्

## परिसरीय-भाविन्यो योजनाः

१. **आधुनिक-संस्कृत-साहित्य-संसाधन-केन्द्रम् ( Resource center for Modern Sanskrit literature )**–साम्प्रतं भारतवर्षस्य न कस्मिन्नपि पुस्तकालये आधुनिकस्य समकालिकस्य वा संस्कृतसाहित्यस्य पद्य-गद्य-चम्पू-काव्य-नाटकादिविविध-विधा- उपविधानां ग्रन्थानां पत्रिकाणां च सामग्रिकं संकलनं विद्यते। अतः परिसरीय-शोध-समित्याः अनुमोदनेन प्रो. बनमालीविश्वालस्य मार्गदर्शने परिसरे 'आधुनिकसंस्कृतसाहित्यसंसाधनकेन्द्रम्' (Resource center for Modern sanskrit literature) इत्यस्य स्थापना जाता। यस्य च ध्येयवाक्यमस्ति–'पुराणमित्येव न साधु सर्वम्' इति। आगामिनि समये एतत्केन्द्रान्तर्गतम् 'आधुनिकसंस्कृतसाहित्यग्रन्थमालायाः' (Modern sanskrit literature series) प्रकाशनं संकल्पितमस्ति। अनेन केन्द्रमाध्यमेन सम्पूर्णभारतवर्षे, विशिष्य उत्तराखण्डे आधुनिक- संस्कृतसाहित्यसम्बन्धिनः शोधार्थिनो विद्वांसश्च लाभान्विताः भवितुमर्हन्ति। अतः गणमान्याः कवयः, सम्पादकाः विद्वांसश्च अनुरुध्यन्ते यत्ते स्वरचनाः उपहाररूपेण परिसरं सम्प्रेष्य प्रोत्साहयन्तु इति।

२. **पाण्डुलिपि-संरक्षणानुसन्धान-केन्द्रम् ( Center for Manuscript Preservation and Research )**–अद्यापि असंख्याः दुर्लभाः महत्त्वपूर्णाश्च पाण्डुलिपयः यत्र-तत्र उपेक्षितावस्थायां लभ्यन्ते, येषां सम्पादनं प्रकाशनं च अत्यावश्यकं वर्तते। तादृशीनां पाण्डुलिपीनां संग्रहणं संरक्षणं च कृत्वा तदुपरि अनुसन्धानम् अनेन केन्द्रमाध्यमेन संकल्पितमस्ति। एतस्य केन्द्रस्य समृद्धये न केवलम् उत्तराखण्डात्, अपितु भारतवर्षस्य प्रत्येकं क्षेत्रात् पाण्डुलिपीनां संग्रहः करिष्यते, येन शोधार्थिनः अन्ये च विद्वांसः उपकृताः भवितुं शक्ष्यन्ति।

३. **बौद्ध-संस्कृत-साहित्य-संसाधन-केन्द्रम् ( Resource center for Buddhist Sanskrit literature )**–वर्तमानसमये भारतवर्षे बौद्ध-संस्कृत-साहित्यस्य अध्ययनम् अनुसन्धानं च विधातुं कस्मिन्नपि विश्वविद्यालये संस्थाने वा न काचित् व्यवस्था वर्तते। अतः परिसरीय-शोध-समित्याः अनुमोदनेन डा. प्रफुल्लगडपालस्य मार्गदर्शने परिसरे 'बौद्ध-संस्कृत-साहित्य-संसाधन-केन्द्रम्' (Resource center for Modern sanskrit literature) इत्यस्य स्थापना जाता। यस्य च ध्येयवाक्यमस्ति–'सर्वेषु सत्त्वेषु दया हि धर्मः' इति। आगामिनि समये एतत्केन्द्रान्तर्गतम् 'बौद्ध-संस्कृत-साहित्य-ग्रन्थमाला' (Buddhist Sanskrit literature series) इत्यस्याः प्रकाशन संकल्पितमस्ति। अस्मिन् च केन्द्रे बौद्ध-संस्कृत-साहित्यस्य उपलब्धये यत्नः विधास्यते। तदधिकृत्य अध्ययन-अध्यापने अनुसन्धानकार्यं च भविष्यति। अनेन केन्द्रमाध्यमेन न केवलं भारतीयाः, अपितु सम्पूर्णस्य विश्वस्य शोधार्थिनो विद्वांसश्च लाभान्विताः भवितुमर्हन्ति।

४. **मुक्त-स्वाध्याय-पीठम्** (Institute of Distance Education)–नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानाङ्गतया संचालितस्य मुक्त-स्वाध्याय-पीठस्य (Institute of Distance Education) माध्यमेन परिसरे आचार्य-शास्त्रि-प्राक्शास्त्रकक्ष्यासु तत्तत्सेतुपाठ्यक्रमेषु च साहित्य-व्याकरण-ज्यौतिषविषयेषु पाठ्यक्रमाः संचालिताः भविष्यन्ति।

५. **शिक्षाशास्त्री** (B.Ed.) **तथा शिक्षाचार्यः** (M.Ed.)–परिसरे आगामिषु सत्रेषु शिक्षाशास्त्रि-शिक्षाचार्य-पाठ्यक्रमौ आरप्स्येते।

६. **अन्ताराष्ट्रिय-संगोष्ठ्याः** (International Seminar) **आयोजनम्**–उत्तराखण्डस्य विदुषां वैदुष्यं सम्पूर्णविश्वे प्रसारयितुं परिसरेण 'उत्तराखण्ड-विद्या-वैभवम्' इति विषये एका अन्ताराष्ट्रियसंगोष्ठी समायोजयिष्यते।

७. **कार्यशालानाम्** (Workshops) **आयोजनम्**–छात्रेषु शास्त्राणाम् आधुनिकतकनीकीज्ञानस्य च विकासदृष्ट्या 'कविशिक्षा', 'अनुवाद-प्रविधिः–सिद्धान्ताः प्रयोगाश्च', 'संस्कृतं सजीवचित्रीकरणं (Sanskrit and Animation)', 'संस्कृते लघुचलचित्रनिर्माणम्' 'संस्कृतम् आनलाइनशिक्षणं च' इत्यादिविषयेषु कार्यशालानाम् आयोजनं संकल्पितं वर्तते।




## श्रीवद्रीनाथस्तवकाञ्जलिः

( कवेर्नवीनादप्रकाशिताच्च श्रीवदरीश-शतकादुद्धृतम् )

-प्रो. बनमाली बिश्वालः

चत्वारि सन्ति धामानि चोत्तराखण्डके शुभे।
गङ्गोत्री यमुनोत्री च वद्री-केदारके तथा।१।

तेषु प्रसिद्ध्यति लोके साक्षाद्वदरिकाश्रमः।
तत्रत्य-वद्रीनाथस्य स्मरणे रमतां मनः।२।

दक्षिणेऽलकनन्दाया वद्रीनाथः प्रतिष्ठितः।
वस्त्राभरणसंयुक्तः मुकुटसमलङ्कृतः।३।

पार्श्वेऽद्रेः नीलकण्ठस्य शङ्करेण प्रतिष्ठितम्।
चतुर्धामसु विख्यातं बद्री-नारायणं परम्।४।

छलेन प्राप्तवान् विष्णुः यत्र शिव-तपःफलम्।
महेशस्थानिनं वन्दे नारायणं छलप्रियम्।५।

ब्रह्मकुण्डं सूर्यकुण्डं गौरीकुण्डं परं मतम्।
वन्दे वद्रिविशालन्तं तप्तकुण्डसमीपगम्।६।

पूज्यन्ते पञ्च रूपाणि बद्रीनाथस्य धामनि।
विष्णोस्तत्पञ्च रूपाणि स्तूयन्ते पञ्च-बद्रयः।७।

आदिवद्रिं प्रणम्यादो ज्योतिर्मठे प्रतिष्ठितम्।
वृद्धवद्रिं ततः स्तौमि योगवद्रिं ततः परम्।८।

भाविवद्रिं प्रणाम्याथ वन्दे वद्रिविशालकम्।
त्रिकालदर्शनं पूर्ण पुण्यदं शुभदं परम्।९।

प्रख्यातान्नारदात्कुण्डात् शङ्करेण समुद्धृतम्।
वद्रीनारायणं वन्दे कृष्णपाषाणविग्रहम्।१०।

गङ्गाजाऽलकनन्दायाः सुशीतवातसेवितम्।
वद्रीनाथं सदा नौमि नारायणाद्रिशोभितम्।११।

योगेशस्य महेशस्य ध्यानशक्तिसमाश्रितम्।
सततं सेवितुं काङ्क्षे वद्रीनाथपदाम्बुजम्।१२।

हिमाच्छादितशैलाभं शेषस्मृतमहर्निशम्।
योगध्यानवशीभूतं नौमि वद्रीविशालकम्।१३।

कुवेरगणेशाभ्यां नु नारदेन प्रपूजितम्।
नौमि ब्रह्मादिभिस्स्तुतं विश्वम्भरं चतुर्भुजम्।१४।

उद्धवेन समं लक्ष्म्या चामरैः सुखसेवितम्।
नौमि तं वद्रिकानाथं शङ्करेण प्रतिष्ठितम्।१५।

पीठस्य परिपार्श्वे तैर्देवैश्च स्वर्गवासिभिः।
वन्दे देवाधिदेवन्तं रुद्रादिभिः सुवेष्टितम्।१६।

सूर्य-चन्द्रमसोर्दीप्त्या धूपदीपैः प्रकाशितम्।
नौमि पद्मासने दिव्यम् इन्द्र-कुवेर-सेवितम्।१७।

सिद्धमुनिजनैर्यस्य जयकारैर्यशः स्तुतम्।
वन्दे तं परमानन्दं वद्रीक्षेत्रे विराजितम्।१८।

यक्ष-किन्नर-कौतुकं ज्ञानगन्धर्वभासितम्।
श्रीवद्रीनाथपादौ तौ प्रणमामि सभक्तिकम्।१९।

वद्रीनारायणं वन्दे माणाग्रामनिवासिनम्।
राष्ट्रस्य नायकं वन्दे राष्ट्र-सीमान्तरक्षकम्।२०।

क्षेत्रे हिमालये दिव्ये नारदक्षेत्रसंज्ञिते।
वन्दे वद्रिं चतुर्भुजं शालिग्राम-स्वरूपिणम्।२१।

सप्तर्षिभिस्तपस्तप्तं यस्मिन् क्षेत्रे विशालके।
वन्दे वद्रीविशालं तं रावलेन प्रपूजितम्।२२।

प्रथितं सिद्धतीर्थेषु आदितीर्थाभिधं नवम्।
अनादिसिद्धतीर्थेऽस्मिन् नौमि तं वद्रिकाधीशम्।२३।

सप्तर्षयः श्रुतेः पाठैः मुखराः यस्य तुष्टये।
तञ्च वन्दे वद्रिनाथं चक्रपाणिं जनार्दनम्।२४।

श्रीलक्ष्मीरमणं नौमि केशवं मध्वरिं हरिम्।
वदर्यधिपतिं वन्दे दैत्यारिं कैटभान्तकम्।२५।

( अनुवर्तते... )

# श्रीरघुनाथसुप्रभातम्

( पण्डितमुरलीधरशास्त्रिविरचितम् )

श्रीश्रीनिवास मुरमुर्दन चक्रपाणे
भक्तिप्रियो हि खलु भक्तजनानुकूल।
देवाधिदेव-भजनीय पदारविन्द
लक्ष्मीपते सुरगुरो तव सुप्रभातम्॥१॥

लंकाधिपेन वरदानमदोद्धतेन
त्रस्तास्समस्त-ऋषयो मुनयश्च देवाः।
जग्मुः स्वरक्षणकृते तु हरेः शरण्यं
भूयात्प्रभोऽच्युत हरे तव सुप्रभातम्॥२॥

आश्वास्य तान् सशरणागत-वत्सलो हि
हन्तुं निशाचरगणान् सह रावणेन।
अंशैर्निजैः स दशरथस्य गृहेऽवतीर्णः
श्रीरामचन्द्र भगवन् तव सुप्रभातम्॥३॥

भग्नं धनुश्च खलु भूप विदेह गेहे
शम्भोः पिनाकमपि तेन सलीलयाहि।
उद्वाह्य तत्र जनकस्य सुतां च सीतां
भूयात्प्रभो रघुपते तव सुप्रभातम्॥४॥

आज्ञां पितुः समुपलभ्य च राज्यमेव
त्यक्त्वा जगाम स वनं नव पञ्चवर्षम्।
व्यापादितुं निशिचरान् मुनिमर्दनाम हि
भूयात्प्रभो रघुपते! तव सुप्रभातम्॥५॥

निर्माय सेतुमतिघोर-गभीरतोये
श्रीसागरे नदपतौ सह वा नरैश्च।
आक्रम्य रावणपुरीं सह सैन्यसंघैः
भूयात्प्रभो रघुपते तव सुप्रभातम्॥६॥

लंकापुरस्थ-सकलानपि राक्षसांश्च
तं रावणं सह सुतैः समरे निहत्य।
दत्वाऽभयं स हरि देवगणान् मनुष्यान्
भूयात्प्रभो रघुपते! तव सुप्रभातम्॥७॥

आकर्ण्य रावणवधं तु समस्ततदेवाः
देवर्षिवर्य्य मुनिसिद्धनाराश्च सर्वे।
हृष्टाः स्तुवन्ति सरसैस्स्तुतिभिश्च रामं
भूयात्प्रभो रघुपते! तव सुप्रभातम्॥८॥

आरुह्य पुष्पक-विमानमतीव शीघ्रं
गत्वा स वानरगणैः स्वपुरीमयोध्याम्।
राज्यं स्वपैतृकमवाप तदा स रामो
भूयात्प्रभो रघुपते! तव सुप्रभातम्॥९॥

रामे प्रशासति धरां स हि धर्म्महीन-
मर्य्यादया च रहितं जननास्तिकं च।
दण्डेन शिक्षयति धर्मविवर्द्धनार्थं
भूयात्प्रभो रघुपते! तव सुप्रभातम्॥१०॥

रामानुजार्यगुरु-शंकर-मध्वयोगी
श्रीवल्लभादिरचितैश्शुभश्लोकवृन्दैः।
नित्यं स्तुवन्ति हि स्वभुं कमलापतिं च
भूयात्प्रभो रघुपते! तव सुप्रभातम्॥११॥

श्रीदेवशर्मद्विजं भक्ततपःप्रभावात्
श्रीरामरूपमधिकृत्य चतुर्भुजोऽऽम्।
देवप्रयागनगरे विदधे स्ववासं
भूयात्प्रभो रघुपते! तव सुप्रभातम्॥१२॥

त्रेतायुगाच्च स हि दाशरथिर्मनस्वी
कर्तुं हितं जनगणस्य सुखं सदैव।
अद्यापि यो वसति क्षेत्रे सुदर्शनाख्ये
कुर्य्याजनस्य निखिलस्य च सुप्रभातम्॥१३॥

इत्थं प्रभुं हयमुखं सरमां तथा च
लक्ष्मीपतिं नरहरिं प्रणिपत्य मूर्ध्ना
सम्प्रार्थये द्विजवरो मुरलीधराख्यो
क्षेमं तनोतु सततं रघुवंशनाथः॥१४॥

-सङ्कलकः विनोदपण्डितः
पुत्रः स्वर्गीयपण्डितमुरलीधरशास्त्रिणः, देवप्रयागः (उत्तराखण्डः)

# परिसरीय–प्रकाशनानि




























Raghunathavartavali : Quarterly News Bulletin of Shri Raghunath Kirti Campus of Rashtriya Sanskrit Sansthan, Pub. by the Principal for Shri Raghunath Kirti Campus, Devprayag, Uttrakhand & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007